जयदेवः ।—सखे ! मया शापितोऽसि, तत् तथ्यमभिधीयताम् । तत् किं तत्त्वत एवासौ मामभ्यर्थयते, उत परिहासेन भणसि ?

(ततः प्रविशन्ति देवशर्म्मा, सुव्रता, पद्मावती च ।)

देवशर्म्मा ।—भद्र ! तत्त्वत एवाहं भवन्तमभ्यर्थये । कुतः परिहासः ? तत् श्रूयताम्—

"तव प्रसादात्तनयो यदि स्या-
द्दासस्तथासौ तनयापि दासी ।
भविष्यती"त्याकुलमर्थितेन
दत्ता हि वत्सा पुरुषोत्तमेन ॥

जयदेवः ।—किं तेन ?

देवशर्म्मा ।—ताञ्च प्रतिज्ञां हृदये निधाय
बाष्पाभिषिक्तां तनयां गृहीत्वा ।
गतोऽस्मि देवस्य च धाम पुण्यम्

जयदेवः ।—दासी कृतेयं न कथं तथापि ?

देवशर्म्मा ।—ब्रवीमि सर्व्वं, शृणु,—निद्रितं मां
स्वप्ने परेशो धृतशङ्खचक्रः ।
उपेत्य देवो जगतामधीशः
स्वभाभिरुद्भासितदिव्यमूर्त्तिः ॥
गम्भीरधीरेण च सुस्वरेण
समादिशत् ।

जयदेवः ।—किम् ?

देवशर्म्मा ।—"तनयां त्वदीयां ।
विधौतदूर्व्वामिव पूतरूपां
प्रयच्छ गत्वा किल केन्दुबिल्व-
ग्रामालयाय स्वगुणैर्वराय
गोस्वामिने श्रीजयदेवनाम्ने ।
तेनैव तुष्टिर्भविता ममेति ॥"

जयदेवः ।—स्वप्नो हि दृष्टो, नहि विद्यतेऽस्य
विनिर्णयः कश्चन सत्यतायाः ।

स्वप्ने तु भिक्षाधृतजीवितोऽपि
पश्येत् किलामुक्तमहार्हभूष-
मात्मानमध्यासितराजमध्यम् ।
श्रद्धाऽपि कार्य्या विदुषा वतात्र ?

देवशर्म्मा-श्रद्धा न कार्य्या ? हृदयं ममेदं
तद्दिव्यमूर्त्तेश्छुरितं प्रभाभि-
र्जागर्त्ति चित्ते वत मेऽधुनापि
ज्योतिर्म्मयः कौस्तुभरश्मिरागः ।
स्वप्नोऽयमित्येव वदन् सचेता
न श्रद्दधीतात्र च कः पृथिव्याम् ?

जयदेवः ।-श्रद्धा कृता नाम,-तथापि कन्या
मह्यं प्रदेया ? तव चाग्रहोऽयम् ?
आश्चर्य्यमेतत् प्रतिभाति मेऽपि ।
शून्यं गृहं मे, जननी पिता च
पुण्यैर्गतौ स्वर्गमहो विहाय
मामत्र पुत्रं वत मन्दभाग्यम् ।
दीनोऽस्मि दैन्यात् कुटजाधिवासी
सदैव दुःखेन नयामि कालम् ।
एतादृशोऽप्यत्र कथं नु कुर्य्यां
दारग्रहं ? को नु भविष्यदृष्टि-
रीहेत वा मे तनयां प्रदातुम् ?

देवशर्म्मा ।-एषोऽहमीहे प्रणयेन हर्षात् ।
दीनोऽसि,-दीना तनया मदीया,
हीनोऽसि,-हीना नहि सा किलान्या
भार्य्याः पतीच्छामयजीवितायाः
पत्युर्हि भाग्यं वरणीयमेव ।
एह्येहि वत्से ! प्रददे ननु त्वां
वराय—"

साहित्यदर्पणम् ।

द्वितीय-परिच्छेदः ।

१मवर्षीय १मखण्डस्य १३२ पृष्ठतोऽनुवृत्तम् ।

वाक्यस्वरूपमाह,–

(क) वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तपदोच्चयः ।

योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः ।

पदोच्चयस्यैतदभावेऽपि वाक्यत्वे वह्निना सिञ्चतीत्यपि वाक्यं

टीका–(क) रसात्मकं वाक्यं काव्यमिति प्रथमपरिच्छेदे काव्यलक्षणमुक्तं, सम्प्रति किं वाक्यलक्षणमित्याकाङ्क्षायां वाक्यलक्षणमाह वाक्यमित्यादि । पदोच्चयः पदसमूहः । योग्यतामाह पदार्थानामिति । परस्परसम्बन्धे इति तृतीयार्थे सप्तमी, परस्परसम्बन्धेनेत्यर्थः । बाधाभावः तत्र तदभावो बाधः यथा–जले वह्नेरभावः, तस्य अभावः बाधाभावः, सद्भावः स्थितिरिति यावत्, यथा जले मीनादेः बाधाभावः । यथा कस्मिंश्चित् पदार्थे कस्यचित् पदार्थस्य सद्भावः केनचित् सम्बन्धेनैव भवति तथा बाधोऽपि कञ्चित् सम्बन्धमाश्रित्यैव भवति, तथाहि जले संयोगेन वह्निर्नास्तीति प्रतीतिः संयोगेन सम्बन्धेन जले वह्नेर्बाधः मीनशैवलादेश्च संयोगेनैव सम्बन्धेन जले सद्भावरूपबाधाभावोऽपि । एवञ्च पदसमूहरूपवाक्यश्रवणानन्तरं प्रत्येकपदनिष्ठया अभिधादिशक्त्या उपस्थितानां पदार्थानां मध्ये वक्तुरभिलषितेन पदार्थानां परस्परसम्बन्धेन एकतरपदार्थे अन्यतरपदार्थस्य सद्भावो योग्यतेति योग्यतालक्षणं, विप्रो ग्रामं गच्छतीत्यादौ हि द्वितीयान्तग्रामपदेन ग्रामनिष्ठकर्म्मता तिङन्तगच्छतिपदेन गमनानुकूलकृतिमत्त्वरूपगमनकर्तृत्वं प्रथमान्तविप्रपदेन च ब्राह्मणत्वजात्याश्रयो व्यक्तिविशेष उपस्थितो भवति । एषाञ्च पदत्रयेण अभिधाशक्त्या उपस्थितानां त्रयाणां पदार्थानां मध्ये द्वितीयान्तग्रामपदोपस्थितस्य ग्रामनिष्ठकर्म्मतारूपपदार्थस्य वक्तुरभिमतेन अनुकूलत्वसम्बन्धेन गमने सद्भावः गमनानुकूलकृतेश्च वक्तुरभिमतेन आश्रयत्वसम्बन्धेन विप्रे सद्भावो विद्यते एव । तथाचाच ग्रामनिष्ठकर्म्मतानुकूलकृत्याश्रयो विप्र इत्येवंरूपो वाक्यार्थबोधो जायते । तस्मादत्र योग्यता विद्यते । वह्निनासिञ्चतीत्यादौ तु तृतीयान्तवह्निपदेन वह्निनिष्ठकरणत्वं सिञ्चतिपदेन

स्यात्। आकाङ्क्षा प्रतीतिपर्य्यवसानविरहः। स च श्रोतुर्जिज्ञासारूपः। निराकाङ्क्षस्य वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यादीनामपि वाक्यत्वं स्यात्।

सेकानुकूलकृतिमत्त्वं उपस्थाप्यते। किन्त्वत्र वह्निनिष्ठकरणताया वक्तुरभिमतेन अनुकूलत्वसम्बन्धेन सेके अभावरूपः बाध एव वर्त्तते, न तु सद्भाव। तथाहि सेको जलनिष्ठकरणताया एव अनुकूलो नतु वह्निनिष्ठकरणताया इति अनयोः पदार्थयोः योग्यता नास्त्येव। पदोच्चयस्येति। एतदभावेऽपि एतस्या योग्यताया अभावेऽपि पदोच्चयस्य वाक्यत्वे वाक्यत्वस्वीकारे इत्यर्थः। तथाच—योग्यतायाः अभावाद् वह्निना सिञ्चतीति पदोच्चयो नैव वाक्यं भवितुम् अर्हति, किन्तु वाक्यलक्षणे योग्यताया अप्रवेशे अस्य वाक्यत्वं स्यात्, तच्च केऽपि नाङ्गीक्रियते, इति भावः। आकाङ्क्षामाह प्रतीतीत्यादि। प्रतीतिः पदार्थोपस्थितिः सा च पदश्रवणानन्तरं पदार्थस्मरणरूपा तस्याः पर्यवसानं अन्वयबोधजनकत्वेन इच्छाऽभावः तस्य अभावः अन्वयबोधजननेच्छा, यथा घटस्याभावः तस्य अभावः घट एव नतु अभावात्मकः तथा अन्वयबोधेच्छाभावस्य अभावोऽपि अन्वयबोधेच्छा एव न तु अतिरिक्तः कश्चित्पदार्थः। एवञ्च पदार्थस्मरणानन्तरं इदं पदार्थस्मरणं पदार्थानां सह अन्वयबोधं जनयतु इत्येवंरूपा या श्रोतुरिच्छा जायते सैव आकाङ्क्षा इति भावः। भवति च पचतीतिक्रियापदश्रवणानन्तरं पाकरूपक्रियापदार्थोपस्थितिस्ततः उपस्थितस्य क्रियापदार्थस्य कारकपदार्थैः सह अन्वयबोधेच्छा सा च कः केन किं पचतीत्येवंरूपा, विप्रः काष्ठेन अन्नं पचतीत्यादिपदसमूहोपस्थितपदार्थैः सह अन्वयबोधे सति तस्या इच्छाया निवृत्तिर्भवति एवञ्च साकाङ्क्षमेव वाक्यमेतत्। ननु यदि तादृशी इच्छैव आकाङ्क्षा तर्हि कथं अभावाभावात्मकं लक्षणं कृतमिति चेत्, श्रोतृभेदेन कालभेदेन च अनन्तानाम् इच्छानाम् अनुगमाभावाद् अभावाभावत्वेन लक्षणं विहितमिति ज्ञातव्यम्। अथवा अन्वयबोधेच्छायोग्यता एव आकाङ्क्षा नतु अन्वयबोधेच्छा, एवञ्च कदाचित् अन्वयबोधेच्छां विनापि शाब्दबोधोदयेन तद्योग्यतामादाय आकाङ्क्षालक्षणसमन्वयः अन्वयबोधेच्छा योग्यता च अन्वयबोधेच्छाया अभावाभावरूपा, तस्मादभावाभावघटितं लक्षणं कृतमिति न दोषः॥

निराकाङ्क्षस्येति। निराकाङ्क्षस्य, आकाङ्क्षारहितस्य पदोच्चयस्य वाक्यत्वे वाक्यत्वस्वीकारे, गौरश्व इत्यादीनाम् आकाङ्क्षारहितपदानामित्यर्थः। अत्र गौर-

(ख) आसत्तिर्बुद्ध्यविच्छेदः, बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चारितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीतिपदेन संगतिः स्यात् । अथाकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्म्मत्वमुपचारात् ।

दार्थेन अश्वादिपदार्थस्य अन्वयबोधेच्छा नास्त्येवेति भावः । योग्यता तु येन केनचित्सम्बन्धेन सम्भवतीति मन्तव्यम् ।

(ख) आसत्तिमाह आसत्तिरिति । बुद्धिः पदज्ञानजन्यपदार्थोपस्थितिः, तस्या अविच्छेदः अव्यवधानं, तथाच—येषां पदार्थानामन्वयबोधो जननीयः तेषां एकपदार्थोपस्थित्यनन्तरमेव पदार्थान्तरस्योपस्थितिरासत्तिरिति भावः । आसत्त्यभावेऽपि वाक्यत्वस्वीकारे दोषमाह बुद्धीति । बुद्धिविच्छेदेऽपि आसत्त्यभावेऽपि, सङ्गतिरन्वयः, तथाच—इदानीमुच्चारितं देवदत्त इतिपदं दिनान्तरोच्चारितं गच्छतीति पदञ्च मिलित्वा वाक्यं भवेत् तच्चानिष्टमित्याशयः ।

योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयो वाक्यमिति वाक्यलक्षणमुक्तं, अत्र च स्वार्थबोधसमाप्तत्वमपि पदोच्चयस्य विशेषणीयं तेन वाक्यांशे,—शून्यं वासगृहं विलोक्येत्यादिरूपे वाक्यलक्षणस्य नातिव्याप्तिरेवञ्च योग्यताकाङ्क्षासत्तियुक्तः स्वार्थबोधसमाप्तः पदोच्चयो वाक्यमिति वाक्यलक्षणं पर्य्यवसितम् ॥

आकाङ्क्षायोग्यतयोः पदोच्चयधर्म्मत्वं सम्पादयति आकाङ्क्षेति । आत्मार्थधर्म्मत्वेऽपि आत्मा च अर्थश्च आत्मार्थौ तयोर्धर्म्मत्वम् आकाङ्क्षाया इच्छारूपत्वाद् आत्मधर्म्मत्वं नियतं तथापि उपचारात् परम्परासम्बन्धेन पदोच्चयधर्म्मत्वम् अनयोरिति शेषः । तथाच साक्षात्सम्बन्धेनैव अनयोरात्मार्थधर्म्मत्वं परन्तु लक्षणे यत् पदोच्चयधर्म्मत्वमुक्तं तत्परम्परासम्बन्धेन न विरुद्धमिति भावः ॥

आकाङ्क्षायाः परम्परासम्बन्धः स्वजन्यजनकत्वरूपः, तत्र स्वं आकाङ्क्षा, तज्जन्योऽन्वयबोधस्तज्जनकत्वं पदोच्चयेऽस्त्येव, एवं योग्यतायाः परम्परासम्बन्धः स्वाश्रयोपस्थापकत्वरूपः, अत्र च स्वं योग्यता तदाश्रयः पदार्थः तस्य उपस्थापकत्वं पदोच्चयेऽस्त्येवेति एतादृशपरम्परासम्बन्धेन अनयोः पदोच्चयधर्म्मत्वम् । इदमुपलक्षणं, आसत्तेरपि पदार्थस्मरणरूपत्वादात्मधर्म्मत्वमेवेति तस्या अपि स्वजन्यजनकत्वरूपपरम्परासम्बन्धेन पदोच्चयधर्म्मत्वमवगन्तव्यम् ॥

(ग) वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ।

योग्यताकाङ्क्षासत्तियुक्त एव ।

इत्थमिति वाक्यत्वेन महावाक्यत्वेन च ॥ उक्तञ्च,—

"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया

वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" इति ॥

तत्र वाक्यं यथा,—"शून्यं वासगृहमि"त्यादि,

महावाक्यं यथा,=रामायणमहाभारतरघुवंशादि ।

(घ) पदोच्चयो वाक्यमित्युक्तं तत् किं पदलक्षणमित्यत आह ।

वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

यथा घटः । प्रयोगार्हेति प्रातिपदिकस्य व्यवच्छेदः ।

अनन्वितेति वाक्यमहावाक्ययोः ।

(ग) योग्यतेति । यथा योग्यताविशून्यः पदोच्चयो न वाक्यं भवितुमर्हति तथा—योग्यतादिशून्यो वाक्योच्चयोऽपि न महावाक्यं भवितुमर्हतीति भावः । महावाक्यत्वे प्राचीनसम्मतिं दर्शयति स्वार्थेति । स्वार्थबोधेन वाक्यार्थबोधेन समाप्तानाम् आकाङ्क्षाशून्यानां जनितान्वयबोधानामिति भावः । वाक्यानां अङ्गाङ्गित्वव्यपेक्षया अङ्गाङ्गित्वेन विशेष्यविशेषणभावेन व्यपेक्षया आकाङ्क्षया संहत्य मिलित्वा एकवाक्यत्वं महावाक्यत्वं जायते । वाक्यानि प्रथमं स्वं स्वमर्थं बोधयित्वा निराकाङ्क्षाणि पश्चात् विशेष्यविशेषणभावेन परस्पराकाङ्क्षायुक्तानि विशिष्टैकार्थप्रतिपादकानि महावाक्यमिति संज्ञां लभन्ते इति भावः ।

(घ) पदलक्षणमाह—वर्णा इति । प्रयोगार्हानन्वितैकार्थबोधका वर्णाः पदमित्यन्वयः, अनन्विता अन्वयशून्याः सन्त एकार्थबोधकाः अनन्वितैकार्थबोधकाः, प्रयोगार्हाश्च ते अनन्वितैकार्थबोधकाश्चेति प्रयोगार्हानन्वितैकार्थबोधकाः । प्रयोगार्हाः प्रयोगयोग्याः, नापदं शास्त्रे प्रयुञ्जीत इतिनियमात् सुप्तिङन्तं पदं इति नियमाच्च प्रयोगार्हा इत्यनेन सुबन्तास्तिङन्ताः सुप्तिङ्भ्यामयुक्ताश्च वर्णा उच्यन्ते । प्रातिपदिकस्य विभक्तिरहितनाम्नः, व्यवच्छेदः पदत्वनिवृत्तिः, इदमुपलक्षणं धातोरपि व्यवच्छेदः ।

अनन्वितेतीति । वाक्यमहावाक्ययोः परस्परसम्बन्धयुक्तविशिष्टैकार्थबोधकत्वमस्तीति तद्वारणाय अनन्वितेति विशेषणमिति भावः । एकेतीति । साकाङ्क्षानेकपदवाक्यानां साकाङ्क्षाणाम् अनेकपदानां अनेकवाक्यानाञ्चेत्यर्थः साका-

एकेति साकाङ्क्षानेकपदवाक्यानाम् । अर्थबोधका इति कचट-तपानाम् । वर्णा इति बहुवचनमविवक्षितम् ।

(ङ) अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ।

तत्र एषां स्वरूपमाह ।

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥ ता अभिधाद्याः ॥

(च) तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा । उत्तमवृद्धेन मध्यमवृद्धमु-

---

ङ्क्षामात्रविशिष्टानां योग्यतादिशून्यतया वाक्यमहावाक्यसंज्ञामप्राप्तानामनेकपदा-नामनेकवाक्यानाञ्च अनन्वितार्थबोधकतया पदत्वप्रसङ्गे तद्वारणाय अर्थस्य एकेति विशेषणमिति भावः । अर्थबोधका इतीति । अर्थबोधका इति विशेषणस्या-भावे प्रयोगार्हा इत्यस्य अनन्विता इत्यस्य एक इत्यर्थविशेषणस्य चासम्भवात् वर्णाः पदमित्येव लक्षणं स्यात् तथाच—कचटतपादिवर्णानां पदत्वं भवेदित्या-शयः । एवञ्च सुबन्ताः तिङन्ताः क्वचित् सुप्तिङ्लोपान्ताः अन्वयशून्याः एका-र्थबोधका वर्णाः पदमिति पदलक्षणम् ॥

वर्णा इतीति । अविवक्षितम् अतात्पर्यविषयीभूतं । वर्णानां बहुत्वं न पदलक्षणे प्रविष्टं किन्तु तादृशवर्णत्वमेव पदत्वम्, एवञ्च यथा बहुवर्णस्थले घटा इत्यस्य पदत्वं तथा एकवर्णस्य दे इत्यस्य च पदत्वमिति भावः ॥

(ङ) सम्प्रति पदार्थानां भेदमाह अर्थ इति । वाच्यः लक्ष्यः व्यङ्ग्यश्चेति पदार्थः त्रिविध इत्यर्थः । अभिधया बोध्यः पदनिष्ठाभिधाशक्तिज्ञान-जन्यज्ञानविषयोऽर्थः वाच्यः कथ्यते इति शेषः । एवं लक्षणया बोध्यः पदनिष्ठ-लक्षणाशक्तिज्ञानजन्यज्ञानविषयोऽर्थो लक्ष्यः कथ्यते, तथा व्यञ्जनया बोध्यः पद-निष्ठव्यञ्जनाशक्तिज्ञानजन्यज्ञानविषयोऽर्थः व्यङ्ग्यः कथ्यते । एवं तिस्रः अभिधा-लक्षणाव्यञ्जनारूपाः शब्दस्य शक्तयः कथ्यन्ते इत्यर्थः ।

(च) अभिधाशक्तिलक्षणमाह तत्रेति । तत्र तासु तिसृषु शक्तिषु मध्ये सङ्केतितार्थस्य प्रसिद्धार्थस्य बोधनात् अन्वयबोधजननात् अभिधाशक्तिः अग्रिमा लक्षणाव्यञ्जनापेक्षया प्रधाना । लक्षणाव्यञ्जनयोर्हि न प्रसिद्धार्थबोध-कत्वमिति न तयोः प्राधान्यमिति भावः । एतेन यथा शक्त्या शब्दानां प्रसिद्धार्थो

द्दिश्य "गामानय" इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य "सास्नादिमत्पिण्डानयनमर्थः" इति प्रथमं प्रतिपद्यते, अनन्तरञ्च "गां बधान, अश्वमानय" इत्यादावावापोद्वापाभ्यां गोशब्दस्य,

---

बोध्यते सा अभिधाशक्तिरिति लक्षणं पर्य्यवस्यतीति ज्ञेयम् ॥ कस्य शब्दस्य कस्मिन्नर्थे अभिधाशक्तिरिति कथं ज्ञायते इति अभिधाज्ञानोपायं व्यवहारादिकं दर्शयन् प्रथमं व्यवहारादभिधाज्ञानं दर्शयति उत्तमेत्यादिना ।

तं मध्यमवृद्धं गवानयनप्रवृत्तं गोरानयने प्रवृत्तं उपलभ्य अनुमानेन ज्ञात्वा बालः समीपस्थः शक्तिज्ञानशून्यशिशुः अस्य गामानय इति वाक्यस्य सास्नादिमत्पिण्डस्य गलकम्बलादिविशिष्टजन्तोः आनयनं, प्रथमं शक्तिज्ञानात् प्राक् प्रतिपद्यते जानाति । आदौ तावद् उत्तमवृद्धस्य मध्यमवृद्धाय गामानय इति आदेशस्ततो मध्यमवृद्धस्य गवानयनक्रियासम्पादनं ततः गोपदस्य 'आनय'पदस्य च अभिधाज्ञानशून्यसमीपस्थबालकस्य गवानयनक्रियादर्शनेन अयं गवानयनविषयप्रयत्नवान् गवानयनक्रियाश्रयत्वादित्याकारकं मध्यमवृद्धस्य गवानयनविषयकप्रयत्नानुमानं ततः अनुमितेन प्रयत्नेन बालकस्य अयं गवानयनविषयकज्ञानवान् गवानयनविषयकप्रयत्नाश्रयत्वादित्याकारकं मध्यमवृद्धस्य गवानयनविषयकज्ञानानुमानं ततः इदं मध्यमवृद्धनिष्ठगवानयनविषयकज्ञानं गामानय इति वाक्यज्ञानजन्यं एतद्वाक्यस्याव्यवहितोत्तरजायमानत्वादित्याकारकमनुमानम् । तेन बालकस्य गामानय इति वाक्यस्य सास्नादिमत्पिण्डानयनमर्थः इति निश्चयः । अनन्तरं गामानय इति वाक्यस्य तादृशार्थनिश्चयानन्तरं गां बधान (बन्धनं कुरु) अश्वमानय इत्यादौ वाक्ये उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य उक्ते इति शेषः । आवापोद्वापाभ्याम् अन्वयव्यतिरेकाभ्यां, सङ्केतं अभिधाशक्तिम् अवधारयति अनुमानेन जानाति । तस्य बालकस्य गामानय इति वाक्यस्य अर्थनिश्चयानन्तरं पूर्व्वोक्तया रीत्या गां बधान अश्वमानय इत्यादिवाक्यश्रवणेन मध्यमवृद्धस्य गोबन्धनादौ प्रवृत्तिदर्शनाद् गां बधानेति अश्वमानयेत्यादिकस्य च वाक्यस्य समुदितार्थनिश्चयः, ततः गामानयेत्यादौ गोपदश्रवणेन मध्यमवृद्धस्य सास्नादिमत्पिण्डज्ञानं इत्येवंरूपं बालकस्यान्वयव्याप्तिज्ञानं, अश्वमानय इत्यादौ गोपदश्रवणाभावेन मध्यमवृद्धस्य सास्नादिमत्पदार्थज्ञानाभाव इत्येवं व्यतिरेकव्याप्तिज्ञानम् एवं आनयपदस्य आहरणरूपार्थे अन्वयव्यतिरेकज्ञानञ्च, ततः

"सा सास्नादिमानर्थः" आनयनशब्दस्य च आहरणमर्थः इति सङ्केतमवधारयति ॥

(ख) क्वचित्तु प्रसिद्धपदसमभिव्याहारात् । यथा । "इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यत्र । क्वचिदाप्तोपदेशात् । यथा "अयमश्वशब्दवाच्य" इत्यत्र । तत्तु सङ्केतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधा नाम ।

ताभ्यां अन्वयव्यतिरेकाभ्यां गोशब्दस्य सास्नादिमत्पदार्थे अभिधाशक्ति'रानय'-पदस्य आहरणे चाभिधाशक्तिरिति बालकस्य व्यवहारेण अभिधाशक्तिनिश्चयः ॥ इति भावः ।

(ख) क्वचिदिति । क्वचित् कुत्रचित् वाक्ये प्रसिद्धपदस्य ज्ञातार्थकपदस्य समभिव्याहारात् सन्निधानाद् अज्ञातार्थकस्यापि पदस्य सङ्केतज्ञानमिति शेषः। इहेति प्रभिन्नकमलोदरे विकसितपद्माभ्यन्तरे । अत्र प्रभिन्नादिपदानां अर्थज्ञानवतः पुरुषस्य कमलमध्ये भ्रमर एव मधु पिबतीति निश्चयाद् मधुकरशब्दस्य भ्रमरे सङ्केतज्ञानम् । आप्तोपदेशाद् आप्तस्य प्राज्ञस्य उपदेशात् सङ्केतज्ञानमिति शेषः । एतदुपलक्षणम् व्याकरणादयोऽपि सङ्केतज्ञानोपाया ज्ञातव्याः तथाचोक्तं शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च, वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इति । वृद्धा व्याकरणादिभ्यः शक्तिग्रहं अभिधाशक्तिज्ञानं वदन्तीत्यन्वयः । तत्र पाचकादिपदानां पाककर्त्रादौ व्याकरणात् शक्तिज्ञानं, गोसदृशो गवय इति वृद्धवाक्यश्रवणानन्तरं गोसदृशजन्तुदर्शनेन वृद्धवचनार्थस्मरणाद् अयं गवयपदवाच्य इत्युपमानात् शक्तिग्रहः, ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामह इत्यादि कोषाद् आत्मभूप्रभृतिशब्दानां ब्रह्मणि शक्तिग्रहः । वाक्यशेषात् शक्तिज्ञानं यथा—यवमयश्चरुर्भवति इत्यादौ यवपदस्य कुत्र शक्तिरिति सन्देहे "वसन्ते सर्व्वसस्यानां जायते पत्रशातनं मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः" इति वाक्यशेषाद् यवपदस्य दीर्घशूकशस्ये शक्तिनिश्चयः अन्यद्-अन्यकृता प्रदर्शितम् । तत्त्वेति । सङ्केतितं प्रसिद्धं शब्दस्य शक्तिरित्यनेनान्वयः । शक्त्यन्तरानन्तरिता शक्त्यन्तरेण अभिधाभिन्नया अपरशक्त्या न अन्तरिता न अरि-तायां मुख्यार्थबोधहेतुभूतस्य अभिधाभिन्नस्य शक्त्यन्तरस्याभावादसौ स्वयं मुख्यार्थ-बोधाय अभिधाशक्तिरङ्गीकरणीयेति भावः ॥

(ज) सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च । जातिर्गोपिण्डादिषु गोत्वादिका । गुणो विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः ॥

शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति । द्रव्यशब्दा एकव्यक्तिवाचिनः हरिहरडित्थडवित्थादयः । क्रियाः साध्यरूपा

(ज) व्यक्तिशक्तिवादमपहाय उपाधिशक्तिवादमाह सङ्केत इति । जातौ गुणद्रव्यक्रियासु च सङ्केतः अभिधा गृह्यते ज्ञायते इत्यर्थः । जातिमाह जातिरिति गोपिण्डादिषु गोत्वादिको धर्म्मः जातिरित्यर्थः तथाच—अनेकद्रव्येषु वर्त्तमान एकधर्म्मो जातिरिति जातिलक्षणं सूचितं । यथा—अनेकगोरूपद्रव्येषु वर्त्तमाना एका गोत्वरूपा जातिः, एवञ्च गोपदस्य गोत्वरूपजातौ शक्तिग्रहो न तु जात्याश्रयव्यक्ताविति भावः । गुणमाह गुण इति । विशेषाधानहेतुः द्रव्याणां परस्परवैलक्षण्यकारणं सिद्धः द्रव्येण सह उत्पन्नः नतु पाकादिवत् साध्यरूपः वस्तुधर्म्मः द्रव्यधर्म्मो गुण इत्यन्वयः, शुक्लादिपदानां हि शुक्लादिगुणे एव शक्तिर्नतु शुक्लादिगुणविशिष्टद्रव्ये इति भावः । विशेषाधानहेतुत्वं दर्शयति शुक्लादय इति । सजातीयेभ्यः गोत्वरूपैकजात्याश्रयेभ्यः व्यावर्त्तयन्ति पृथक् कुर्व्वन्ति । द्रव्यशब्दार्थमाह द्रव्यशब्दा इति । एकव्यक्तेः एकमात्रद्रव्यस्य वाचिनः वाचका शब्दा द्रव्यशब्दा इत्यर्थः हरिहरेत्यादि । हरिप्रभृतयः शब्दा हि तत्तन्नाम्ना ख्यातमेकमेव जनं बोधयन्तीति एते द्रव्यशब्दाः । एवञ्च संज्ञाशब्दा एव द्रव्यवाचकाः कथ्यन्ते सा च संज्ञा द्विविधा चिरन्तनी आधुनिकी च । तत्र चिरन्तनी संज्ञा नारायणादौ हरिप्रभृतिशब्दानाम्, आधुनिकी च तत्तज्जनेषु डित्थडवित्थादिशब्दानामिति बोध्यम् । एवञ्च संज्ञाशब्दानां तत्तद्द्रव्ये एव शक्तिरिति भावः । क्रियामाह क्रिया इति । साध्यरूपा साध्यं साधनीयं नतु गुणवद्वस्तुना सह उत्पन्नं रूपं स्वरूपं येषां तादृशा ये वस्तुधर्म्माः द्रव्यधर्म्माः ते एव क्रियापदेनाभिधीयन्ते इत्यर्थः । वस्तुधर्म्मा द्विधा सिद्धः साध्यश्च, सिद्धौ जातिगुणौ साध्या च क्रियेति ज्ञेयम् ॥ एषु साध्यरूपवस्तुधर्म्मेषु मध्ये अधिश्रयणं चुल्यां स्थाल्याः स्थापनं अधःश्रयणं चुल्याः स्थाल्या अवनमनं ते आद्यान्तौ यस्य सः तदादिर्यः पूर्व्वापरीभूतः व्यापारकलापः क्रियासमूहः स पाकादिशब्दवाच्य इत्यर्थः तथाच—पाकादिशब्दानां पाकक्रियायां शक्तिर्नतु पाककर्त्तरि चैत्रादौ इति भावः । एवंविधोति एषु जात्यादिषु चतुर्षु मध्ये ये व्यक्तिः [illegible]रूपो धर्म्मो जातिगुणक्रियारूपास्तेषु सङ्केतो गृह्यते न तु व्यक्तौ तत्तद्द्रव्ये इत्यर्थः ।

वस्तुधर्म्माः पाकादयः । एष हि अधिश्रयणाधःश्रयणाद्यन्तादिपूर्व्वापरीभूत-व्यापारकलापः पाकादिशब्दवाच्यः । एष्वेव हि व्यक्तेरुपाधिषु सङ्केतो गृह्यते न व्यक्तौ आनन्त्यव्यभिचारदोषापातात् ॥

अथ लक्षणा ।

१३ । मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता ॥

"कलिङ्गः साहसिकः" इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसम्भवन् यया शब्दस्य शक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति,

---

व्यक्तौ शक्तिस्वीकारे दोषमाह आनन्त्येति । आनन्त्यव्यभिचारौ दोषौ तयोः आपातात् सम्भवाद् आनन्त्यम् अनन्तशक्तिकल्पनागौरवं, गवादिपदानां प्रत्येकगोपिण्डादिषु शक्तिस्वीकारे नानागोव्यक्तिषु अनन्तशक्तिकल्पनारूपं गौरवं स्यादिति भावः । यदि च नानागोव्यक्तिषु नानाशक्तिर्नाङ्गीक्रियते किन्तु गोपदस्य एकगोव्यक्तावेव शक्तिरिति स्वीक्रियते तदा व्यभिचारः स्यात् व्यभिचारः कार्य्यकारणनियमभङ्गः, कारणं विना नहि कार्य्यं सम्भवतीति कार्य्यकारणनियमः किन्तु कारणं विना कार्य्यस्योत्पत्तौ तादृशनियमस्य भङ्गः स्यात् स चानुचित इति भावः । शक्तिज्ञानाद्धि पदार्थानां शाब्दबोधोदयाद् गोपदार्थस्य शाब्दबोधं प्रति गोपदार्थे गोपदस्य शक्तिज्ञानं कारणं, परन्तु गोपदस्य एकगोपदार्थे शक्तिस्वीकारे हि गोपदश्रवणात् सङ्केतग्रहकाले दृष्टगोपदार्थस्यैव शाब्दबोधो भवेत् नच तथा जायते तदा सङ्केतग्रहकाले अदृष्टगोपदार्थस्यापि शाब्दबोधसम्भवात् सङ्केतकालादृष्टगोपदार्थे शक्तिज्ञानरूपस्य कारणस्याभावेऽपि तद्विषयकशाब्दबोधात्मककार्य्योत्पत्तिरूपो व्यभिचारः स्यादिति भावः ॥

टीका । (क) । अथ लक्षणेति अभिधानिरूपणानन्तरं लक्षणा निरूप्यत इत्यर्थः । मुख्यार्थबाधे,मुख्यार्थेन अभिधाबोध्येनार्थेन विवक्षितार्थस्य बाधे असम्भवे मुख्यार्थबाधे मुख्यार्थस्य बाधे अन्वयासम्भवे इत्यर्थस्तु न मनोरमस्तथा सति काकेभ्योरक्ष्यतां दधीत्यादौ मुख्यार्थस्य अन्वयसम्भवाद् लक्षणा न स्यात्, अस्मन्मते तु दध्युपघातकस्य काकमार्ज्जारादेः विवक्षिततया मुख्यार्थेन तदसम्भवाद् मुख्यार्थे बाधोऽस्त्येव । अथवा मुख्यार्थबाधे मुख्यार्थस्य ,बाधे विवक्षितान्वयासम्भवे इत्यर्थः, तथाच—काकेभ्य इत्यादौ मुख्यार्थस्य काकस्य काकत्वेन अन्वयो न

यथा च "गङ्गायां घोषः" इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्व्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र "गङ्गातटे घोषः"

वक्तुरभिमतः किन्तु दध्युपघातकत्वेन अन्वयः स च बाधित एवेति ज्ञेयम्। तद्युक्तः मुख्यार्थेन सम्बन्धविशिष्टः, अन्यः अभिधाशक्त्या अबोध्यः। अन्यः मुख्यार्थभिन्नः इत्यर्थस्तु न मनोरमः, तथा सति रामोऽस्मि सर्व्वंसहे इत्यादौ लक्ष्यार्थस्य अत्यन्तदुःखसहिष्णुरामस्य मुख्यार्थरामभिन्नत्वाभावाद् लक्षणा न स्यात् तादृशोऽर्थः, यया शब्दशक्त्या, रूढेः बहुतर-प्रयोगरूपायाः प्रसिद्धेः, प्रयोजनात् कस्माच्चिन्निमित्ताद्वा, प्रतीयते ज्ञायते, सा लक्षणाशक्तिः अर्पिता पण्डितैः कल्पिता नतु स्वभावसिद्धेति भावः। आदौ हि लाक्षणिकपदश्रवणं, ततस्तस्य अभिधाशक्तिस्मरणं, ततो मुख्यार्थस्योपस्थितिस्ततः मुख्यार्थबाधज्ञानं ततो मुख्यार्थसम्बन्धज्ञानं ततो रूढिज्ञानं प्रयोजनज्ञानम्वा ततो लक्ष्यार्थस्योपस्थितिः यथा च लक्ष्यार्थोपस्थितिः यया शब्दशक्त्या भवति सा लक्षणा इति भावः। लक्ष्ये लक्षणा सङ्गमयति कलिङ्ग इत्यादिना। स्वार्थे स्वमुख्यार्थे असम्भवन् विवक्षितमन्वयमलभमानः, कलिङ्गवासिपुरुषेण साहसिकस्य अभेदान्वयो हि विवक्षितः स च कलिङ्गशब्दस्य मुख्यार्थे देशविशेषे न सम्भवतीति भावः। स्वसंयुक्तान् स्वेन मुख्यार्थेन युक्तान् आधेयत्वसम्बन्धयुक्तान् कलिङ्गदेशो हि आधारः तद्वासी पुरुषश्च आधेय इति भावः। प्रत्याययति, बोधयति, प्रयोजनलक्षणां दर्शयति यथा चेति। जलमयादिरूपस्य अर्थस्य वाचकत्वाद् अभिधया बोधकत्वात् प्रकृते घोषस्य वासक्रियाया अधिकरणत्वेन विवक्षितान्वये, सामीप्यादिसम्बन्धेन सम्बन्धिनं सम्बन्धयुक्तं। अर्पितेत्यस्य अर्थमाह। सा शब्दस्य शक्तिरित्यनेनान्वयः, अर्पिता स्वाभाविकेतरा, स्वाभाविका स्वभावसिद्धा शक्तिरभिधा तस्या इतरा अस्वाभाविकी कल्पनाजन्येत्यर्थः। वा अथवा, ईश्वरानुद्भाविता ईश्वरेण अनुद्भाविता अनुत्पादिता। केचित्तु अस्मात् शब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा अभिधा शक्तिरित्याहुस्तन्मते ईश्वरेणानुद्भाविता शक्तिरभिधा, लक्षणा तु न तथा परन्तु इदानीन्तनपण्डितैराविष्कृतेति तेषामाशयः॥ पूर्व्वत्रेत्यादि। पूर्व्वत्र पूर्व्वस्मिन् उदाहरणे हेतुः कलिङ्गशब्दप्रयोगस्य कारणं, कलिङ्गः

इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनं । हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्याद् इत्यत उक्तम्—"रूढेः प्रयोजनाद्वापीति"। केचित् तु "कर्म्मणि कुशलः" इति रूढावुदाहरन्ति। तेषामयमभिप्रायः—"कुशं लाति" इति व्युत्पत्तिलभ्यः

साहसिक इत्यादौ कलिङ्गवासी जनः साहसिक इत्यनुक्त्वा यत् कलिङ्ग इत्युक्तं तत्र कलिङ्गवासिपुरुषरूपार्थबोधनाय कलिङ्गशब्दस्य बहुतरप्रयोगरूपा प्रसिद्धिरेव कारणमिति भावः। उत्तरत्रेति उत्तरत्र गङ्गायां घोषः प्रतिवसतीत्यत्र, इति प्रतिपादनाद् इतिमात्रबोधनाद् अलभ्यस्य अज्ञेयस्य शीतत्वपावनत्वयोः धर्म्मयोः अतिशयस्य उत्कर्षस्य बोधनरूपं प्रयोजनं बोधनमेव प्रयोजनमिति अर्थः। गङ्गातटे घोषः प्रतिवसतीत्यनुक्त्वा यत् गङ्गायां घोषः प्रतिवसतीत्युक्तं अतिशीते अतिपवित्रे गङ्गातटे वसति इत्येवंरूपस्यार्थस्य बोधनमेव तत्र निमित्तं तथाहि गङ्गातटे वसतीति वाक्ये तादृशार्थो न लभ्यते गङ्गायां वसतीति प्रयोगे तु जलप्रवाहरूपायाः गङ्गायाः अतिशीतत्वस्वभावाद् अतिपूतत्वस्वभावाच्च गङ्गापदप्रयोगमहिम्ना लक्ष्यार्थस्य तीरस्य व्यञ्जनाशक्त्या यत् अतिशीतत्वमतिपावनत्वञ्च ज्ञायते एतदेव वाचकपदमपहाय लाक्षणिकपदप्रयोगस्य प्रयोजनमितिभावः। अनयोरुदाहरणयोरयं क्रमो यथा—आदौ कलिङ्गः साहसिक इति वाक्यश्रवणं ततः कलिङ्गशब्दस्य अभिधाशक्तिस्मरणं ततः कलिङ्गशब्दमुख्यार्थस्य देशविशेषस्योपस्थितिस्ततः साहसिकपदाद् अभिधाशक्त्या साहसयुक्तार्थस्मरणं ततः कलिङ्गशब्दस्य मुख्यार्थबाधज्ञानं ततो मुख्यार्थस्य देशस्य लक्ष्यार्थेन देशवासिपुरुषेण सह आधेयत्वसम्बन्धज्ञानं ततो रूढिज्ञानं ततो लक्षणाशक्तिस्मरणं ततो लक्षणया देशवासिपुरुषार्थोपस्थितिः ततो वाक्यार्थबोधः। द्वितीये च आदौ गंगायामित्यादिवाक्यश्रवणं ततोऽभिधाशक्त्या गङ्गापदात् जलप्रवाहरूपार्थोपस्थितिः सप्तमीविभक्त्या अधिकरणत्वोपस्थितिश्च ततोऽभिधया घोषादिप्रत्ययपदार्थोपस्थितिस्ततो गङ्गापदस्य अभिमतान्वये मुख्यार्थबाधज्ञानं ततः सामीप्यसम्बन्धज्ञानं ततः प्रयोजनज्ञानं ततो लक्षणावृत्तिस्मरणं ततो लक्ष्यार्थस्य तीरस्य उपस्थितिः ततो वाक्यार्थबोधः लक्षणामूलव्यञ्जनया अतिशीतत्वरूपप्रयोजनज्ञानम्। प्राक् अत्र लाक्षणिकपदप्रयोगः किञ्चित् प्रयोजनमुद्दिश्यैव कृत इत्येवंरूपेण सामान्यभावेन प्रयोजनज्ञानं जायते पर्य्यवसाने तु विशिष्यैव प्रयोजनज्ञानमुत्पद्यते इति

कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्ध-सम्बन्धिनं दक्षरूपमर्थं बोधयति। तदन्ये न मन्यन्ते। कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। (क)।

अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तं। व्युत्पत्ति-लभ्यस्य मुख्यार्थत्वे "गौः शेते" इत्यत्रापि लक्षणा स्यात्। "गमेर्डो"

सुधीभिर्विभाव्यम्। रूढेः प्रयोजनाद्वेति यदुक्तं तत्र हेतुं दर्शयति हेतुमित्यादिना हेतुं रूढिरूपं प्रयोजनरूपञ्च लक्षणाकारणं विनापि सम्बन्धिनः मुख्यार्थसम्बन्धवि-शिष्टस्य यस्य कस्यचिद् अनभिमतपदार्थस्य लक्षणे बोधने सति अतिप्रसङ्गः अति-व्याप्तिः लक्षणस्येति शेषः। रूढेः प्रयोजनस्येत्यस्यानुपादाने कलिङ्गः साहसिकः इत्यादौ कलिङ्गपदात् स्वामित्वसम्बन्धेन तद्देशपतेरुपस्थितिः स्यात् नच तत्र कलिङ्गपदस्य रूढिरस्ति प्रयोजनन्तु नास्त्येव, अतस्तादृशलक्ष्यार्थबोधरूपाति-प्रसङ्गवारणाय एतदुक्तमेवं प्रयोजनलक्षणायामपि ज्ञेयम्। केचित्त्विति काव्यप्रका-शकारादय इति भावः। लाति गृह्णाति, व्युत्पत्तिः प्रकृतिप्रत्ययविभागकल्पना, तया लभ्यः व्युत्पत्तिलभ्यः, कुशग्राहिरूपः कुशग्रहणकर्तृरूपः, प्रकृते सप्तम्यन्त-कर्म्मपदार्थान्वये असम्भवन् योग्यतामलभमानः विवेचकत्वेन धर्म्मेण यत् साधर्म्यं एकधर्म्मवत्त्वं तदेव सम्बन्धः मुख्यलक्ष्यार्थयोरिति भावः। तेन सम्बन्धेन सम्बन्धिनं सम्बन्धयुक्तं दक्षरूपम् निपुणरूपमर्थं लक्ष्यार्थं कर्त्तव्यवैदिककर्म्मानुष्ठा-नाय कुशग्रहणकर्त्ता हि विवेचको भवति, विवेचनं विना उत्कृष्टकुशसंग्रहस्या-भावाच्च कुशग्रहणकर्त्तरि मुख्यार्थे विवेचकत्वधर्म्मोऽस्ति निपुणपुरुषेऽपि लक्ष्यार्थे विवेचकत्वमस्ति, तस्मान्मुख्यार्थः कुशग्राही स्वेन सादृश्यसम्बन्धयुक्तं लक्ष्यार्थं निपुणरूपार्थं रूढ्या बोधयतीत्याशयः॥ एतन्निरस्यति तदन्य इति। अन्ये इति स्वमताभिप्रायेणोक्तम्। मुख्यार्थत्वाद् अभिधेयार्थत्वात्, शक्तिग्रहं व्याकरणो-पमानकोषाप्तवाक्याद्व्यवहारतश्चेत्यादिनियमात् कोषादिप्रसिद्धस्यार्थस्य अभि-धाबोध्यत्वात् कुशल शब्दस्य कोषे दक्षरूपार्थस्यैव दर्शनाद् अस्य मुख्यार्थ-त्वमेवेति भावः।

टीका (ञ)। अन्यद्धीति। व्युत्पत्तिनिमित्तं व्युत्पत्तिलभ्यार्थप्रतीतौ विशे-षणीभूतो धर्म्मः तद् अन्यद् अपरं अभिधेयार्थज्ञाने विशेषणीभूतो धर्म्मः प्रवृत्ति-निमित्तं, तच्च अन्यत् नतु सर्वत्राभिन्नं पाचकादिपदेषु तयोरभेदेऽपि गवादिपदे

(उणादि २। २०) इति गम्धातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात् ॥ (ज)।

तद्भेदानाह।

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥

रूढावुपादानलक्षणा यथा-"श्वेतो धावति"।

प्रयोजने यथा—"कुन्ताः प्रविशन्ति"।

अनयोर्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयाऽन्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः

तयोर्भेदात्तथाहि—औणादिकडोप्रत्ययनिष्पन्नस्य गोशब्दस्य गमनकर्तृत्वं व्युत्पत्तिनिमित्तं गोशब्दस्य गोत्वजातौ सङ्केतज्ञानाच्च गोत्वं प्रवृत्तिनिमित्तमतस्तयोर्भिन्नत्वमेवेति भावः।

व्युत्पत्तिलभ्यस्येति। अयं भावः, यदि हि सर्व्वत्र व्युत्पत्तिलभ्यार्थ एव मुख्यार्थ इति नियमः स्यात् तर्हि गोशब्दस्य गमनकर्तृत्वरूपोऽर्थः मुख्यार्थः स्यात्, तथाच गौः शेते इति वाक्ये गमनकर्तुः शयनस्यासम्भवात् गोशब्दस्य मुख्यार्थबाधात् तादृशजन्तौ लक्षणा प्रसज्येत, एवञ्च सर्व्वेषु रूढशब्देषु लक्षणैव भवेदिति। (ज)

टीका। लक्षणायाः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह मुख्यार्थस्येत्यादि। अत्र यथेति मुख्यार्थेनेति चाध्याहार्य्यं तथाच—वाक्यार्थे समभिव्याहृतपदार्थे मुख्यार्थस्य अन्वयसिद्धये मुख्यार्थेन इतरस्य मुख्यार्थविलक्षणस्य अर्थस्य यथा शब्दशक्त्या आक्षेपः बोधनं आत्मनोऽपि मुख्यार्थस्यापि उपादानात् बोधनात् एषा उपादानलक्षणा कथ्यते इत्यन्वयः। मुख्यार्थविषयकं ज्ञानं उपादानं तद्धेतुर्लक्षणा उपादानलक्षणा अथवा उपादीयते स्वार्थो गृह्यतेऽनेनेति उपादानं तन्नाम्नी लक्षणा उपादानलक्षणा। एतेन लक्षणे संज्ञाबीजमपि प्रदर्शितम् ॥ श्वेतो धावतीत्यत्र समभिव्याहृतधावनपदार्थे कर्तृत्वसम्बन्धेन श्वेतगुणस्य मुख्यार्थस्य अन्वयसिद्धये मुख्यार्थेन श्वेतगुणेन इतरस्य श्वेतगुणविशिष्टाश्वस्य श्वेतगुणस्य च बोधनात् श्वेतपदे उपादानलक्षणा, एवमन्यत्रापि ॥ अनयोर्हीति। अनयोः उदाहरणयोः अचेतनतयेति नहि अचेतनयोः श्वेतगुणकुन्तयोः धावनप्रवेशक्रिययोः कर्तृत्वं सम्भवति इति मुख्यार्थबाधोऽस्त्येवेति भावः। एतत्सिद्धये अन्वयसि-

पुरुषादयश्चाक्षिप्यन्ते । पूर्वत्र प्रयोजनाभावाद्रूढिः । उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनं । अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम् । लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः । इयमेव "अजहत्स्वार्था" इत्युच्यते ॥ (ट)

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा—"कलिङ्गः साहसिकः" "गङ्गायां घोषः" इति च । अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः । यथा वा—

उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे
सुखितमास्स्व ततः शरदां शतम् ॥

द्वये आत्मसम्बन्धिनः आत्मनः मुख्यार्थस्य सम्बन्धिनः सम्बन्धयुक्ताः, तथाहि प्रथमोदाहरणे मुख्यार्थेन श्वेतगुणेन समवायसम्बन्धयुक्तोऽश्वः द्वितीये च मुख्यार्थेन कुन्तेन संयोगसम्बन्धयुक्तः कुन्तधारिपुरुष इति भावः । आक्षिप्यन्ते बोध्यन्ते श्वेतादिभिः मुख्यार्थैरित्यनेनान्वयः । अतिगहनत्वम् अतिस्थूलत्वम् अस्या लक्षणलक्षणाया भेदं दर्शयति अत्र चेति । परस्यैव मुख्यार्थविलक्षणस्य लक्ष्यार्थस्यैव । अजहत्स्वार्था, न जहत् न त्यजन् स्वार्थो मुख्यार्थो यां लक्षणां सा अजहत्स्वार्था यत्र लक्षणायां मुख्यार्थस्य परित्यागो न स्यात् सा अजहत्स्वार्थेति भावः । (ट) ॥

टीका । लक्षणलक्षणामाह अर्पणमिति । अत्रापि ययेति अध्याहार्य्यं वाक्यार्थे समभिव्याहृतपदार्थे परस्य मुख्यार्थभिन्नस्य अन्वयसिद्धये यया शब्दशक्त्या स्वस्य मुख्यार्थस्य अर्पणं, मुख्यार्थभिन्नस्य बोधाय आत्मनः परित्यागः उपलक्षणहेतुत्वात् स्वार्थत्यागेन अपरस्य प्रतीतिरुपलक्षणं तस्य हेतुत्वादेषा लक्षणलक्षणा कथ्यते, एतेन संज्ञाबीजमपि प्रदर्शितम् । यथा कलिङ्गः साहसिक इत्यादौ साहसिकपदार्थरूपे वाक्यार्थे मुख्यार्थभिन्नस्य कलिङ्गवासिपुरुषस्य अन्वयसिद्धये मुख्यार्थस्य कलिङ्गदेशस्य आत्मनः परित्यागेन पुरुषरूपार्थबोधनं, तथाच—नहि कलिङ्गदेशस्य

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दाः आत्मानमर्पयन्ति । अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधः ।

वैपरीत्यलक्षणसम्बन्धः । फलमप्यपकारातिशयः । इयमेव "जहत्स्वार्था" इत्युच्यते । (ठ)

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा ।

ताः पूर्व्वोक्ताश्चतुर्भेदलक्षणाः—

मुख्यार्थस्य साहसिकपदार्थेन अन्वयः सम्भवति किन्तु कलिङ्गवासिपुरुषस्यैव तस्मादत्र कलिङ्गशब्दः स्वार्थं परित्यज्य स्वार्थभिन्नं पुरुषमेव बोधयति एवमन्यत्रापि ॥ लक्ष्ये लक्षणं सङ्गमयति अनयोर्हीति । अनयोः वाक्ययोः आत्मानं मुख्यार्थं अर्पयतः परित्यजतः । उदाहरणान्तरं दर्शयति यथावेति । उपकृतमित्यादि कश्चिदत्यन्तापकारिणं पुरुषं प्रति कस्यचिदुक्तिरियं । भवता त्वया बहु पर्य्याप्तं, उपकृतं उपकारः कृतः, ममेति शेषः, तत्र उपकारे किं अधिकं उच्यते कथ्यते मयेति शेषः । भवता परं पर्य्याप्तं यथा स्यात्तथा सुजनता सौजन्यं प्रथिता प्रकाशिता, हे सखे ततः तस्मात् कारणात् त्वं ईदृशं परोपकारं विदधत् कुर्व्वन्नेव शरदां वत्सराणां शतं व्याप्य सुखितं सुखयुक्तं यथा स्यात् तथा आस्स्व तिष्ठ । अत्रेत्यादि आत्मानं अर्पयन्ति स्वार्थपरित्यागेन लक्ष्यार्थमपकारादिकं लक्षयन्ति, तथाचात्र उपकृतपदेन अपकृतं, सुजनता पदेन दुर्ज्जनता, सुखितपदेन दुःखितत्त्वं लक्ष्यते । मुख्यार्थबाधं दर्शयति अत्रेति । प्रतिपादनात् कथनात्, नहि अपकारिणमुद्दिश्य भवता उपकृतमित्यादिवाक्यकथनं सङ्गच्छते, तस्मात् मुख्यार्थस्य उपकारादेः प्रकृतेऽन्वयासम्भव एवात्र मुख्यार्थबाध इति भावः । मुख्यार्थसम्बन्धं दर्शयति-वैपरीत्येति वैपरीत्यं विपरीतत्वं लक्षणं स्वरूपं यस्य तादृशः, तथाच—अत्र मुख्यार्थलक्ष्यार्थयोरुपकारापकारयोः सम्बन्धः विपरीतत्वं अपकारो हि उपकाराद्विपरीत एवेति भावः । नन्वत्र रूढेरभावात प्रयोजनलक्षणैव स्वीकार्य्या तदत्र किंप्रयोजनं इत्याशङ्क्याह फलमपीति । अपकारातिशयबोधनमेवात्र लक्षणायाः प्रयोजनमिति भावः । इयमेवेति । जहत्स्वार्था जहत् त्यजन् स्वार्थः मुख्यार्थः यां लक्षणां सा जहत्स्वार्था तथाच मुख्यार्थपरित्यागादियं नाम्ना जहत्स्वार्थेति भावः । (ठ) ।

टीका । पुनरपि लक्षणाया द्वैविध्यमाह आरोपेति । ताः पूर्व्वोक्ताः चतुष्प्रकाराः लक्षणाः प्रत्येकं आरोपेण अध्यवसायेन च युक्ताः । द्विधा भवन्ति अत्र विशेषणे

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् ।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका ॥

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत् सारोपा । रूढ़ावुपादानलक्षणा सारोपा यथा—"अश्वः श्वेतो धावति" । अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते । प्रयोजने यथा—"एते कुन्ताः प्रविशन्ति" । अत्र सर्व्वनाम्ना कुन्तधारिपुरुषनिर्द्देशात् सारोपात्वम् । रूढ़ौ लक्षणलक्षणा सारोपा यथा—"कलिङ्गः पुरुषो युध्यते" । अत्र पुरुषकलिङ्गशब्दयोराधार्य्याधेयभावः सम्बन्धः ; प्रयोजने यथा—"आयुर्घृतम्" । अत्रायुष्कारणमपि घृतं कार्य्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते; अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम् । यथा वा—राजकीये पुरुषे गच्छति "राजासौ गच्छति" इति । अत्र स्वस्वामिभावलक्षणः सम्बन्धः । यथा वा—अग्रमात्रे हस्तावयवे

तृतीया तथाच आरोपेण सह वर्त्तमाना सारोपा, अध्यवसानेन च वर्त्तमाना साध्यवसाना लक्षणा । अनयोः लक्षणमाह विषयेति । अनिगीर्णस्य निगीर्णः शब्देन अप्रतिपादितः अर्थे इति यावत् तद्भिन्नः अनिगीर्णः शब्देन प्रतिपादितः शब्दलभ्य इति यावत् तस्य विषयस्य लक्ष्यार्थस्य अन्यतादात्म्यप्रतीतिकृद् अन्येन मुख्यार्थेन तादात्म्यं अभेदः तस्य प्रतीतिकृत् बोधकारिणी लक्षणा सारोपा । निगीर्णस्य शब्देनाप्रतिपादितस्य अर्थबललभ्यस्य विषयस्य मुख्यार्थेन सह अभेदबोधकारिणी लक्षणा साध्यवसानिका साध्यवसाना मता ज्ञाता पण्डितैरिति शेषः । अश्वः श्वेतोधावतीति । अनिगीर्णस्वरूपः अश्वशब्देन प्रतिपादित इत्यर्थः । स्वसमवेतश्वेतगुणतादात्म्येन स्वस्मिन् अश्वे समवेतः समवायसम्बन्धेन स्थितः यः श्वेतगुणः तस्य तादात्म्येन अभेदेन प्रतीयते । श्वेतः अश्व इत्यत्र हि श्वेतपदेन श्वेतगुणवान् अश्वः लक्ष्यते स च प्रयुक्तेन अश्वशब्देन प्रतिपादितः सन् मुख्यार्थस्य श्वेतगुणस्य अभेदेन प्रतीयते तथाहि श्वेतः अश्वं इति पदयोः समानविभक्त्या यः श्वेतः स अश्वः इत्येवमभेदबोधाद् अभेदबोधकारिणीयं लक्षणा सारोपैवेति भावः । सर्व्वनाम्ना एतत्पदेन कुन्तधारिपुरुषस्य लक्ष्यार्थस्य निर्द्देशात् शब्दप्रतिपादितं तेन सारोपात्वमित्यर्थः । आधार्य्याधारभावः आश्रयाश्रयित्व-

भागे "हस्तोऽयम्" । अत्रावयवावयविभावलक्षणसम्बन्धः । ब्राह्मणोऽपि "तक्षासौ" । अत्र तात्कर्म्म्यलक्षणः सम्बन्धः । "इन्द्रार्थासु स्थूणासु अमी इन्द्राः" अत्र तादर्थ्यलक्षणः सम्बन्धः । एवमन्यत्रापि । निगीर्णस्य पुनः विषयस्यान्यतादात्म्यप्रतीतिकृत् साध्यवसाना । अस्याश्चतुर्षु भेदेषु पूर्व्वो-दाहरणान्येव । तदेवमष्टप्रकारा लक्षणा ।

> सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि ।
> सादृश्यात् तु मता गौण्यस्तेन षोड़शभेदिताः ॥

रूपः सम्बन्धः आधारः कलिङ्गः आधारी च पुरुष इति आधार्य्याधारत्वरूप-सम्बन्धो विद्यत एवेति भावः ॥

आयुर्घृतमिति । कार्य्यकारणभावसम्बन्धेन सम्बन्धि यद् आयुः तस्य तादा-त्म्येन अभेदेन प्रतीयते ज्ञायते इत्यर्थः । तथाहि घृतं आयुषः कारणमतोऽत्र मुख्यलक्ष्ययोरायुर्घृतयोः सम्बन्धः कार्य्यकारणभाव इति भावः । अन्यवैलक्षण्येन अव्यभिचारेण आधिक्येन घृतं यथा आयुर्जनकं द्रव्यान्तरं न तथेति भावः । अव्यभि-चारेण नियमेन । राजकीये इति । गच्छतीति भावे सप्तमी । अत्र राजपदेन राजकीयः पुरुषः लक्ष्यते स्वस्वामिभावलक्षणः भृत्यप्रभुत्वरूपः; अत्र माननीयत्वं प्रयो-जनम् । अग्रमात्रे इति हस्तोऽयमित्यत्र हस्तपदेन हस्तस्याग्रावयवो लक्ष्यते, सम्बन्धः अवयवावयवित्वं हस्तोऽवयवी अग्रभागोऽवयवश्चेति भावः । इयं रूढ़ा लक्षणा । तक्षासौ अत्र तक्षपदेन तक्षकर्म्मकारी ब्राह्मणो लक्ष्यते सम्बन्धः तात्कर्म्म्यं तत्कर्म्मकारित्वं, तक्षा सूत्रधारः । अत्र तक्षकर्म्मनैपुण्यं प्रयोजनम् । इन्द्रार्थासु इन्द्रः इन्द्रमूर्त्तिः अर्थः प्रयोजनं यस्याः तासु स्थूणासु स्तम्भेषु, बोधनीयास्विति शेषः, अमी इन्द्राः, अत्र इन्द्रपदेन इन्द्रमूर्त्तिप्रयोजनकस्तम्भा लक्ष्यन्ते इत्यर्थः । तादर्थ्यं तत्प्रयोजनकत्वं, अत्र पूज्यत्वं प्रयोजनम् ।

निगीर्णस्येति निगीर्णस्य शब्देन अप्रतिपादितस्य लक्ष्यार्थवाचकपदपरि-त्यागेन पूर्व्वोदाहरणान्येव अस्या उदाहरणानीत्यर्थः यथा—श्वेतो धावति, कलिङ्गः युध्यते इत्यादि । एवं आयुर्घृतमित्यत्र घृतपदपरित्यागेन, राजासावित्यत्र असौ पदत्यागेन, हस्तोऽयमित्यत्र अयमिति पदत्यागेन, तक्षासौ इत्यत्र असौ पदत्यागेन, अमी इन्द्रा इत्यत्र इदम्पदत्यागेन च साध्यवसाना लक्षणा बोद्धव्या ॥

ताः पूर्व्वोक्ता अष्टभेदा लक्षणाः । सादृश्येतरसम्बन्धाः कार्य्यकारणभावादयः । अत्र शुद्धानां पूर्व्वोदाहरणान्येव । रूढ़ावुपादानलक्षणा सारोपा गौणी यथा—"एतानि तैलानि हेमन्ते सुखानि" । अत्र तैलशब्दः तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते । प्रयोजने यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु "एते राजकुमारा गच्छन्ति" । रूढ़ावुपादानलक्षणा साध्यवसाना गौणी यथा—"तैलानि हेमन्ते सुखानि," प्रयोजने यथा—"राजकुमारा गच्छन्ति" । रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा—"राजा गौड़ेन्द्रः कण्टकं शोधयति" । प्रयोजने यथा—गौर्व्वाहीकः, रूढ़ौ लक्षणलक्षणा साध्यवसाना गौणी यथा—"राजा कण्टकं शोधयति" । प्रयोजने यथा—"गौर्जल्पति" ।

टीका । सादृश्यात् इतरे सादृश्यभिन्नाः सम्बन्धा यासां ताः, सकला अपि पूर्व्वोक्ता लक्षणा शुद्धाः कथ्यन्ते इति शेषः । सादृश्यात् सम्बन्धात् या लक्षणा भवन्ति ता गौण्यः गौणोनामकाः कथ्यन्ते, तेन लक्षणाः षोड़शभेदिताः षोड़शप्रकारा उक्ता इति शेषः । तैलानीति । अत्र तैलपदस्य मुख्यार्थः तिलोत्पन्नस्नेहः लक्ष्यार्थस्तु सर्षपादिस्नेहस्तस्मात् स्नेहत्वरूपधर्म्मेण मुख्यलक्ष्ययोः सादृश्यसम्बन्धोऽस्ति, इयं मुख्यार्थस्यापि बोधनात् उपादानलक्षणा, तथा एतानीति विशेष्यनिर्द्देशात् अभेदबोधाच्च सारोपा । राजकुमारेष्विति । अत्र समानविद्यावयोवस्त्वरूपसादृश्यं, पूर्व्ववत् उपादानलक्षणा सारोपा च ज्ञेया । विशेष्यपदत्यागेनानयोरेव साध्यवसानात्वं दर्शयति तैलानीत्यादि । राजेत्यादि, अत्र कण्टकपदेन शत्रुर्लक्ष्यते पीड़ादायकत्वधर्म्मेणाच मुख्यलक्ष्ययोः सादृश्यसम्बन्धोऽस्ति मुख्यार्थस्य परित्यागादियं लक्षणलक्षणा गौड़ेन्द्रमित्यनेन लक्ष्यार्थनिर्द्देशाच्च सारोपा ज्ञेया । यद्यपि क्षुद्रशत्रौ तु कण्टक इति कोषात् अभिधयैव कण्टकपदेन क्षुद्रशत्रुज्ञानं तथापि गौड़ेन्द्रस्य प्रबलशत्रुत्वात् तादृशशत्रोर्बोधाय लक्षणापेक्षितेति ज्ञेयं, इयं रूढ़िलक्षणा । गौर्व्वाहीक इति । वाहीकः वहनकर्त्ता, अत्र गोपदेन गोवहनकर्त्ता लक्ष्यते, अज्ञत्वादिधर्म्मवत्त्वरूपं सादृश्यमत्र मुख्यलक्ष्ययोः सम्बन्धः, पूर्व्ववदियं लक्षणलक्षणा सारोपा च ज्ञेया । विशेष्यपदपरित्यागेन अनयोरेव साध्यवसानात्वं दर्शयति राजेत्यादि ॥

अथ केचिदाहुः—"गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते । ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति" । तदयुक्तम् । गोशब्दस्यागृहीतसङ्केतं वाहीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च । अभिधाया विरतत्वात्, विरतायाश्च पुनरुत्थानाभावात् । अन्ये च पुनर्गोशब्देन "वाहीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते" । तदप्यन्ये न मन्यन्ते । तथाह्यत्र गोशब्दाद्वाहीकार्थः प्रतीयते न वा ? आद्ये गोशब्दादेव वा, लक्षिताद्वा गुणात् अविनाभावद्वारा । तत्र न प्रथमः,—वाहीकार्थेऽस्यासङ्केतितत्वात् । न द्वितीयः—अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशाऽसम्भवात् । शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते । न द्वितीयः । यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य वाहीकशब्दस्य च सामानाधिकरण्यमसमञ्जसं स्यात् ।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सह अन्वयमलभमा-

---

अत्र केचिदाहुरित्यादि । गोसहचारिणः गोनिष्ठाः, जाड्यं अज्ञत्वं मान्द्यं आलस्यं तदादयः लक्ष्यन्ते लक्षणया बोध्यन्ते गोशब्देनेति शेषः । ते च लक्षिताः गुणाः वाहीकार्थस्य अभिधाने अभिधया बोधने निमित्तीभवन्ति कारणीभवन्ति । गौर्वाहीक इत्यत्र गोशब्दादभिधया मुख्यार्थोपस्थितेरनन्तरं मुख्यार्थबाधज्ञानात् लक्षणया गोनिष्ठानां जाड्यमान्द्यगुणानां बोधः, लक्षितेन जाड्यमान्द्यादिधर्म्मेण च हेतुना अभिधयैव गोशब्दात् वाहीकार्थबोध इति तेषामाशयः । एतन्निरस्यति तदयुक्तमिति । तत्, मतं, अयुक्तं असङ्गतं । अत्र हेतुं दर्शयति गोशब्दस्येति । अगृहीतसङ्केतं, न गृहीतः ज्ञातः सङ्केतः अभिधाशक्तिर्यत्र तादृशं, अभिधातुं अभिधया बोधयितुं असामर्थ्यात्, शक्तेरभावात्, विरतत्वात् गोशब्दार्थं प्रकाश्य क्षीणत्वात् उत्थानाभावात् अर्थान्तरबोधनाभावात् सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति नियमादिति भावः । अयं भावः, गोशब्दस्य वाहीकार्थेऽभिधाशक्तिरेव नास्तीति अभिधया वाहीकार्थबोधः नैव सम्भवति ; किन्च गोशब्दश्रवणानन्तरं गोशब्दस्याभिधाशक्तिः पशुविशेषरूपमर्थं प्रकाश्य क्षीणा सती न पुनरर्थान्तरं बोधयितुं शक्नोतीति नैव सङ्गतं तेषां मतमिति ।

अपरेषां केषाञ्चित् मतमाह अन्ये चेति । स्वार्थसहचारिगुणसाजात्येन स्वार्थः मुख्यार्थः पशुविशेषः तस्य सहचारिणो गुणाः जाड्यमान्द्यादयः तेषां साजात्येन

गोऽऽजत्वादिसाधर्म्यसम्बन्धाद्वाहीकार्थं लक्षयति । वाहीकस्याजत्वाद्यतिशयबोधनं प्रयोजनं । इयञ्च गुणयोगाद्गौणी इत्युच्यते, पूर्व्वा तु उपचारामिश्रणात् शुद्धा । उपचारो हि नाम अत्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम् । यथा—अग्निमाणवकयोः, शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः । तस्मादेवमादिषु शुद्धैव लक्षणा ।

सादृश्येन एतच्च मुख्यलक्ष्ययोः सम्बन्धः इति भावः । वाहीकार्थगताः वाहीकनिष्ठाः, एतन्मते मुख्यार्थोपस्थितेरनन्तरं स्वार्थे सहचारिगुणसाजात्येन सम्बन्धेन लक्षणया वाहीकनिष्ठानां जाड्यमान्द्यादिगुणानां बोध इति भावः । एतदपि निराकरोति तदपीति । अन्ये । इति स्वमताभिप्रायेणोक्तम् । तथाहीति । आद्ये प्रतीयते इति कल्पे, तल्लक्षितात् तेन गोशब्देन लक्षितात् जाड्यमान्द्यादिगुणात् अविनाभावद्वारा अविनाभावेन सम्बन्धेन । न प्रथमः, वाहीकशब्दादेव प्रतीयते इति कल्पो न सम्भवतीति भावः, अत्र हेतुमाह अस्य गोशब्दस्य असङ्केतितत्वात् अभिधाशून्यत्वात् । न द्वितीयः, अविनाभावेन सम्बन्धेन तल्लक्षितात् गुणात् वाहीकार्थः प्रतीयते इति कल्पोऽपि न सम्भवतीत्यर्थः, अत्र हेतुमाह—अविनाभावलभ्यस्य अविनाभावेन सम्बन्धेन लभ्यस्य ज्ञेयस्य अर्थस्य शाब्देऽन्वये शाब्दबोधे प्रवेशासम्भवात् उपस्थित्यसम्भवात् । अयं भावः—न विना भूयते इति अविनाभावः यं विना यो न तिष्ठति तेन सह तस्य अविनाभावसम्बन्धोऽस्ति यथा वह्निं विना धूमो न तिष्ठतीति वह्निना सह धूमस्य अविनाभावसम्बन्धो विद्यते एव तस्माच्च धूमदर्शनात् अविनाभावेन सम्बन्धेन वह्निपदार्थस्य ज्ञानं भवति, परन्तु एतादृशसम्बन्धेन पदार्थोपस्थित्या शाब्दबोधस्वीकारे धूमं पिब इति वाक्यश्रवणात् धूमपदार्थस्य अविनाभावसम्बन्धेन वह्न्युपस्थितौ वह्निं पिब इति बोधः स्यात् तस्मादभिधादिशब्दशक्त्या उपस्थितपदार्थानामेव शाब्दबोधे प्रवेशः नतु सम्बन्धलभ्यानां सम्बन्धलभ्यानान्तु पदार्थानां अनुमानादौ प्रवेश एवेति ॥ अत्र प्रमाणं दर्शयति शब्दीति । हि तथाहि शाब्दी शब्दोत्थिता आकाङ्क्षा अन्वयेच्छा कः गच्छति कं गच्छति केन गच्छतीत्यादिरूपा शब्देनैव विप्रः, ग्रामं, अश्वेन, इत्यादिपदेनैव प्रपूर्य्यते चरितार्था भवति नतु अविनाभावादिसम्बन्धेन प्रपूर्य्यते इत्यर्थः ॥ गोशब्दात् वाहीकार्थः प्रतीयते नवेति विकल्पे प्रथम कल्पे प्रकारद्वये दोषं प्रदर्श्य अधुना न प्रतीयते इति द्वितीयकल्पमपि दूषयति नतु द्वितीय इति । न द्वितीयः,

व्यङ्ग्यस्य गूढ़ागूढ़त्वाद् द्विधा स्युः फललक्षणा । प्रयोजने याः अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य गूढ़ागूढ़तया प्रत्येकं द्विधा भूत्वा षोड़शभेदाः । तत्र गूढः—काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः । यथा— "उपकृतं बहु तत्र" इति । अगूढ़ः—अतिस्पष्टतया सर्व्वजनसंवेद्यः । यथा— "उपदिशति कामिनीनां यौवनमद एव ललितानि" । "अत्र उपदिशति" इत्यनेन "आविष्करोति" इति लक्ष्यते । आविष्कारातिशयश्चाभिधेयवत् स्फुटं प्रतीयते ।

